शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: अष्टम: परिच्छेद:

के वर्णाः कस्य रसस्य प्रतिपादकाः ? इति सोदाहरणं प्रतिपादनम्।

माधुर्य गुण व्यञ्जका वर्णाः – ट ठ ड ढ वर्जिताः कादयोमावसानाः निजवर्गान्त्ययुक्ताः रेफणकारौ ह्रस्वान्तरितौ समासाभावो मध्यमः समासो वा, रचना:- पदान्तयोग माधुर्यवती रचना, माधुर्यस्य व्यञ्जिका। उक्तं च साहित्य दर्पणे —

'मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्विना।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा॥'

यथा – 'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।
जनयन्ति मुहुर्यूनामन्तः सन्तापसन्ततिम्॥'

अत्र प्रथमार्द्धे अनङ्गमङ्गलेति: ङकारेण सह गकार सम्बद्धास्तकारा माधुर्यं गुणं व्यञ्जयन्ति। इति स्पष्टमस्ति।

ओजो गुण व्यञ्जका वर्णाः — वर्गीयाः प्रथमाः वर्णाः क च ट त प एतैः सह तदन्तिमा वर्णाः ख छ ठ थ फ एवं तथा वर्गीयाः तृतीय वर्णाः ग ज ड द ब एतैः सह तदन्तिमा वर्णाः घ झ ढ ध भ एताः युक्ता ओजो गुणं व्यञ्जयन्ति। एवं रेफस्योपरि अध उभयत्र वा प्रयोगाः ट ठ ड ढैः सह शकारः षकारश्च ओजसः व्यञ्जकाः। दीर्घसमासः, औद्धत्यशालिनी संघटना च ओजसो व्यञ्जिका। उक्तञ्च साहित्यदर्पणे —

'वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तथा समासो बहुलो घटनौद्धत्यशालिनी॥'

यथा – 'चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य
सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति
कचांस्तव देवि भीमः॥'

अत्र 'च्चद्' इति, 'द्ध' इति 'ड्ड' इति च संयुक्ता वर्णाः भ्रमित इत्यत्र सरेफो वर्णः शो शो इति तालव्य शकारौ, अन्ये च संयुक्ताः वर्णाः ओजो व्यञ्जकाः।

प्रसाद गुण व्यञ्जका वर्णाः — श्रुतिमात्रेणार्थ बोधकाः शब्दाः प्रसादस्य व्यञ्जकाः अयं सर्वेषु रसेषु सर्वासु रचनासु च तिष्ठति। उक्तं च साहित्यदर्पणे —

'शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः।

यथा – 'सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि॥'

अत्र श्रुतिमात्रतः अर्थबोधकाः शब्दाः प्रसाद गुणव्यञ्जकाः इति

उपेन्द्र झा
29/4/20
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
कुशैला, पूर्णियाँ

शास्त्रि द्वितीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणः पञ्चमः परिच्छेदः

व्यक्तिविवेककारस्य महिमभट्टस्य मतेन रसादि व्यङ्ग्यस्य
अनुमान गतार्थतां तस्याश्च खण्डन प्रकार प्रदर्शनम्।

ननु व्यञ्जना वृत्तेः, अनुमाने एवान्तर्भावः, तथा च काव्यं रसा-
न्वितं विभावादिमत्त्वात् । इत्यनुमानेनैव रसादि व्यङ्ग्यज्ञान
तदर्थं व्यञ्जनावृत्तेः स्वीकरणम् अनर्थकमेवेति व्यक्तिविवेककारस्य मतम्।
तेषां अयमभिप्रायः — 'विभावानुभावव्यभिचारीसंयोगाद्रसनिष्पत्तिः' इति
भरत सूत्रम्। विभावादीनां ~~...~~ प्रतीतिर्हि रसादि प्रतीतेः साधनमिष्यते। तेन
विभावादयो रत्यादिभावानां कारणकार्य सञ्चारिणो भवन्ति। यथा- आलम्बनो-
द्दीपन रूपो विभावः रत्यादेः कारणम्, अनुभावः कार्यम् भुजाक्षेपादिः, व्यभि-
चारिणस्तु सहचारिणः। एते च विभावादयः प्रसिद्धं अनुमापका एव
रसादीन् ज्ञापयन्ति। अनुमान प्रकारश्च 'सीता रामविषयकरतिमती, तद्वि-
विलोकने स्मित कटाक्षवत्त्वात्, या नैवं सा नैवं; यथा मन्थरा इति।
ते चानुमीयमाना रत्यादयः पुनः पुनरनुशीलनात् आस्वादपदवीं गताः
सन्तः सीमं सम्बन्धेन सामाजिक निष्ठं रसतामापद्यन्ते। इत्थमेव यथा
अविनाभावेन धूमितं ~~...~~ प्रानुकूलं दृष्टेः कारणं मन्यते न च विभावादि
प्रतीतिः अनुमीयमान रत्यादि योगेन रसादि रूपतां प्राप्नुवन्ति रत्यादेः कारणं
उच्यते महिमभट्टानामाशयः।

अत्रोच्यते – किं शब्दाभिनय समर्पित विभावादि प्रत्ययानुमित रत्यादि
गतं रत्यादिज्ञानमेव रसत्वेनाभिमतं भवतः ? शब्दाभिनय समर्पित
विभावादि प्रत्ययं अनुमितं रामादिगत रत्यादि भावनया भावुकैः अनुभूय-
स्वप्रकाशानन्दो वा ? आद्ये न विवादः किन्तु रामादिगत रत्यादिज्ञानं रस-
संज्ञया नोच्यते इत्यलम्। अतोऽस्माभिरुक्तो रसो नानुमानगम्यः। द्वितीयं तु
व्याप्तिग्रहाभावात् विलक्षणस्य कटाक्षवत्त्व हेतोरसाधारणतया अनैकान्तिकत्वम्
न च यत्र यत्र रामादि गतानुरागवत्त्वं तत्र तत्र रसो भवति इति व्याप्ति-
गृहीता 'अयं सामाजिकः शृङ्गार रसवान् रामादिगतानुरागज्ञानवत्त्वात्' इति व्याप्ति
सामाजिकान्तरवत् इत्यनुमानेन रसज्ञानं भविष्यति इति वाच्यं व्याप्ति
ग्रहाभावात्। ~~धूमादि~~ अतः अनुमाने तु धूमाग्न्योः व्याप्तिः गृहीतैव भवति,
न चात्र तथा अनुरागज्ञान रसयोः व्याप्तिरस्ति। न हि अनुरागज्ञानं सदा रसेन सह
अभिव्यक्तिकारणं तिष्ठति। यतो हि जरन्मीमांसकानां हृदये रागादिज्ञानसत्त्वेऽपि
न रस लेशोऽपि उदेति। अतो हेतुर्व्यभिचारी एव।

अपि च सहृदयैः स्व हृदये यो रसास्वादः क्रियते स न अनुमानविषयः
किन्तु प्रत्यक्ष विषयः।

यच्चोक्तं तेनैव – 'यत्रैव विभावानुभाव सात्त्विक सञ्चारि-
णाम अभिधानं अभिनयो वा तत्र तत्र शृङ्गारादि रसाविर्भावः' इति
सुग्रहैव व्याप्तिः पक्षधर्मता च। ~~...~~

कथं तु विभावादि रूपा सामग्री व्यञ्जना वादिनां मते व्यङ्ग्यार्थ
अभिव्यक्तेः कारणं सैव मम (महिमभट्टस्य) अनुमितेः साधनमिति।

अत्र सिद्धान्तवादी समाधत्ते – इदं कथनमपि अस्माकं व्यञ्जना-
वादिनां न विरुद्धम्। न हि एवं क्रिया प्रतीतिः अनुमानजनितं रसादि
ज्ञानम्, अथवा 'सम्यो रसादि प्रतीतिमात्र विभावादि प्रतीति सत्त्वात्'।
इत्यनुमानगम्यो रसादिविषयक बोधः ? ते आस्वादरूपत्वेन अभिमताः
किन्तु स्वप्रकाशमात्र विश्रान्तः सोऽत्रान्तरप्रतीतिभेदः। तेनात्र सिद्धान्तपक्षि-
तोदर्थात् – रसादेरनुमेयत्व साधनादर्थात्, अर्थान्तरस्य – रामादिगतस्य
अनुरागस्य अनुमानेन साधनात् हेतौ दोषाभावेऽपि इति दिक्।

उपेन्द्र झा 29/5/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुरुक्षेत्र, हरियाणा

शास्त्री प्रथम खण्डस्य कृते (साहित्यांश)

साहित्यदर्पणः द्वितीयः परिच्छेदः

---

उपादान लक्षणाया लक्षणलक्षणातो वैलक्षण्यम् उदाहरणद्वारा स्फोरणम् ।

---

लक्षणा द्विविधा – एका उपादान लक्षणा
अपरा लक्षण लक्षणा चेति ।
के उभयोर्भेद इति चेत् ? शृणु —

यत्र मुख्यार्थं विशिष्ट तदितरार्थ प्रतिपादक शक्तं, तत्र उपादान लक्षणा । अतएव इयम् अजहत्स्वार्थेत्युच्यते । एवं स्वार्थ परित्याग पूर्वक अन्यार्थ प्रतिपादक शक्तिः लक्षण लक्षणात्वम् । अतएवायं जहत्स्वार्था इत्युच्यते ।

उपादान लक्षणायाः उदाहरणं यथा – 'कुन्ताः प्रविशन्ति', अत्र अचेतनानां कुन्तानां प्रवेशन क्रिया सामर्थ्यं नास्ति इति कुन्तैक रूप मुख्यार्थ विशिष्ट कुन्तधारी पुरुष रूपस्य मुख्यार्थेतरार्थस्य प्रतिपादकत्वात् कुन्तधारी पुरुषाः प्रविशन्ति इति उपादान लक्षणायामर्थो बोध्यते।

लक्षण लक्षणायां उदाहरणम् — 'गङ्गायां घोषः' ।
विपरीत लक्षणायाश्च उदाहरणम् —

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्स्व ततः शरदां शतम् ॥'

इत्यत्र, उपकृतादयः शब्दाः अपकारिणं प्रति अन्वयं लभमानाः अपकारादिरूपे रूपेऽर्थे परिणता अतएव अयमेव उपादान लक्षणा लक्षण लक्षणाया भेदः । यद् उपादान लक्षणायां मुख्यार्थस्य आक्षेपोऽपि उपादानम् । लक्षण लक्षणायां तु परस्यैवोपलक्षणं मुख्यार्थस्य त्याग एवेति ।

---

उपेन्द्र झा
२१/४/२०
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
मुरलीगंज, पूर्णिया